# Shridhara Suprabhatam

# શ્રીધરસુપ્રભાતમ્

## Document Information

Text title : Shridhara Suprabhatam 2

File name : shrIdharasuprabhAtam2.itx

Category : deities_misc, gurudev, shrIdharasvAmI, suprabhAta

Location : doc_deities_misc

Proofread by : Paresh Panditrao

Description/comments : shrIdharasvAmI stotrANi. shrIdharasandeshaH

Latest update : January 14, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2023

*sanskritdocuments.org*

Shridhara Suprabhatam

# શ્રીધરસુપ્રભાતમ્

નમસ્તે શ્રીધરસ્વામિન્ જગત્કલ્યાણકૃદ્ વિભો ।
ત્યક્ત્ત્વાશુયોગનિદ્રાત્વમુત્તિષ્ઠ ગુરુપુઙ્ગવ ॥ ૧॥

વરદનામપુરસ્થગુહાશ્રયો
    વરસમાધિમુપૈષિ ચિરં યદિ ।
કથમહોજનતોપ્રકૃતિર્ભવેત્
    ઝટતિ જાગ્રહિ જાગ્રહિ જાગ્રહિ ॥ ૨॥

ત્વન્નામકીર્તનપરાનિજભક્તવૃન્દાઃ
    સઙ્ગૃહ્યપુષ્પફલતોયમુદારચિત્તાઃ ।
દ્વારે વસતિ બહવસ્ત વ દર્શનાર્થ
    શ્રી શ્રીધરાર્યભગવન્તવ સુપ્રભાતમ્ ॥ ૩॥

સ્નાત્વા સુતીર્થસલિલે વટવોદ્વિજાગ્ર્યાઃ
    સમ્પાદ્ય દિવ્યતુલસીવનમાલિકાં ચ ।
ભક્ત્યા તવાર્પિતુમિમાં નતકન્ધરાંસાઃ
    શ્રી શ્રીધરાયભગવન્તવ સુપ્રભાતમ્ ॥ ૪॥

ઉદ્ઘોષયન્ત્યુપનિષત્પઠનં મહાન્તઃ
    શ્રુત્વૈવકેચિદપિ સમ્મુદિતાઃ પ્રહર્શાત્ ।
શ્રીરામનામજપિનો વયસાઽતિવૃધ્દ્વાઃ
    શ્રીશ્રીધરાર્યભગવન્ તવ સુપ્રભાતમ્ ॥ ૫॥

આરાર્તિકં સમાધિગૃહ્યકરેણ નાર્યો
    ગાયન્તિ તેઽમલયશોઽમિત ભક્તિયુક્તાઃ ।
આનન્દજાશ્રુ પરિશિક્ત મુખારવિન્દાઃ
    શ્રીશ્રીધરાર્યભગવન્ તવ સુપ્રભાતમ્ ॥ ૬॥

આગત્ય દેવનિકરાસ્સકલત્રપુત્રાઃ

વૈમાનિકાશ્ચ ગગને જયશદ્બયુક્તાઃ ।
પુષ્પૈઃ કિરન્તિ મવવદ્બન સમ્ભવૈસ્તે
શ્રીશ્રીધરાર્યભગવન્ તવ સુપ્રભાતમ્ ॥ ૭॥

રમ્ભાદયોઽપ્સ રગણાસ્સુરલોકવાસ
પ્રીતિંવિહાયભવદન્તિકમેત્યસદ્યઃ ।
નૃત્યન્તિ થૈય થથથૈ થથથૈ થથેતિ
શ્રીશ્રીધરાર્યભગવન્ તવ સુપ્રભાતમ્ ॥ ૮॥

અભ્યર્ચ્ય રામમુષસી પ્રણિપત્ય દેવીં
વ્યાસાદયો મુનિગણાસ્ત્વભિનન્દિતું ત્વામ્ ।
આશીર્ભિરપ્યથ મહજ્જ્વલદગ્નિતેજાઃ
શ્રીશ્રીધરાર્યભગવન્ તવ સુપ્રભાતમ્ ॥ ૯॥

સ્વાઙ્કે નિધાય ભગવાન્ધરણીતનૂજાં
સૌમિત્રિ મારુતિ વિભીષણભાનુજાદ્યૈઃ ।
આરુહ્યપુષ્પકમુપૈષ્યતિ જાગ્રહિ ત્વં
શ્રીશ્રીધરાર્યભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૦॥

શ્રીરામદાસગુરુરપ્ય ચિરાત્સમાધે-
રુત્થાય તેઽન્તિકમુપાગમદાદરેણ ।
તસ્માત્સુજાગ્રહિ વિભો સુનબાવનાય
શ્રીશ્રીધરાર્યભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૧॥

ઇતિ શ્રીધરસુપ્રભાતં સમ્પૂર્ણમ્ ।

Proofread by Paresh Panditrao

*Shridhara Suprabhatam*

pdf was typeset on January 15, 2023

Please send corrections to *sanskrit@cheerful.com*